संस्कृतवार्ताः

दिनाङ्क :- 23.05.2025 प्रातः - 06:55

## अथ वार्ताः

### जम्मूकश्मीराक्रमणम्

जम्मूकश्मीरराज्ये ह्यः दुरापादितस्य आतङ्क्याक्रमणस्य अनन्तरं सकलायाम् कश्मीरोपत्यकायां कठोरा सुरक्षाव्यवस्था संवर्धिता आक्रमणमिदं श्रीनगरात् पञ्चाशीतिकिलोमीरात्मके दक्षिणकश्मीरस्य अनन्तनाग-जनपदे व्यापादितम्। भारतीयसेनया सीआरपीएफ्-दलेन जम्मूकश्मीराक्षिबलेन च एतस्मिन् क्षेत्रे संयुक्ताभियानं प्रचाल्यते। आतङ्कवादिनः अन्वेष्टुं श्वानाः गुप्तचरसाधनानि च तत्र पहलगामक्षेत्रे नियोजितानि। राजमार्गेषु संवेदनशीलक्षेत्रेषु च अतिरिक्तानि उपरक्षणस्थलानि योजितानि। उत्तरीसेनायाः कमाण्डर-लेफ्टिनेण्ट-जनरल-एम.वी. सुचेन्द्रकुमाराय अद्य श्रीनगरे स्थानीय-सेनाध्यक्षैः उपत्यकायां वर्तमान-सुरक्षास्थितिविषये सूचना दास्यते। श्रीनगर-गुलमर्ग-सोनमर्ग-सदृशेषु पर्यटनस्थलेषु अन्वेषणाभियानं तीव्रं जातम्। पर्यटकानां निवासस्थानानि निकषा सुरक्षाव्यवस्था संवर्धिता। शीर्षसुरक्षासूत्रानुसारि अभिज्ञानाभियानस्य कारणेन साहाय्योद्धारकार्येण च मृतकानां सङ्ख्या साम्प्रतमपि अन्वेषयते। अपरत्र जम्मू-कश्मीर-प्रशासनेन होरात्रं यावत् आपात्कालिक-सङ्ख्या प्रसारिता श्रीनगरे स्थापिता आपात्कालिकसङ्ख्या- 0194 - 24 57 543, 0194 – 24 83 651 अनन्तनागे च नियन्त्रणकक्षस्य दूरभाषसङ्ख्या – 0193 22 22 337, 77 80 88 57 59, 60 06 36 52 45

### अमितशाहः

केन्द्रीयगृहमन्त्री अमितशाह ह्यः पहलगामक्षेत्रे पर्यटकेषु जातं कातरयुतं आतङ्क्याक्रमणप्रहारं उद्दिश्य श्रीनगरे वरिष्ठाधिकारिभिः साकम् एकमुपवेशनं विहितवान्। गृहमन्त्री अद्य उपराज्यपालेन मनोजसिन्हा-इत्येतेन साकं घटितम् आक्रमण-स्थलम् अवलोकयिष्यति। तदनु आक्रमणस्य साक्षिभिः सह करिष्यति अथ च उपचारयुतानां व्रणितानां चिकित्सालयमपि प्राप्स्यति। केन्द्रीयगृहमन्त्री ह्यः रात्रौ श्रीनगरं सम्प्राप्तवान् तदनु राजभवनाय प्रस्थितः। इतः पूर्वं गृहमन्त्रिणा दृश्याङ्कनमाध्यमेन सम्बद्धाधिकारिभिः साकम् उपवेशनं समनुष्ठितम्। उक्तं च यत् कातराः आतङ्कवादिनः कस्यामपि परिस्थित्याम् नैव त्यक्ष्यन्ति।

### जम्मू-कश्मीर-विश्वनेतारः

सम्पूर्णविश्वस्य नेतारः जम्मू-कश्मीर-प्रदेशे ह्यः आतङ्कीयाक्रमणस्य निन्दाम् अकुर्वन्। अमरीकादेशीयः राष्ट्रपतिः प्रधानमन्त्रिणा नरेन्द्रमोदिना दूरभाषं कृत्वा निर्दोषानां प्राणहार्निं प्रति गभीरं शोकं प्रकटितवान् तथा च निर्दोषाणां न्यायाय साहाय्यं कर्तुं च अथ च आक्रमणकारिणः न्यायस्य कारावासे आनेतुं च पूर्णतया अमरीकायाः समर्थनस्य आश्वासनम् अददात्। अमरीकीयोपराष्ट्रपतिः जे.डी. वैन्स् इत्येषः सम्प्रति स्वपरिवारेण सह भारते स्थितः वैन्स् इत्येषः अपि अस्य आक्रमणस्य विषये दुःखम् प्रकटितवान्, तत् हृदयविदारकम् इति उक्तवान्। रशियादेशस्य राष्ट्रपतिना व्लादिमिर् पुतिन् इत्यनेन पहलगाम्-नगरे अनेकेषां पर्यटकानां मृत्योः विषये राष्ट्रपतिं द्रौपदी-मुर्मु-इत्येतां प्रधानमन्त्रिणं नरेन्द्रमोदिनं च प्रति शोकः प्रकटितः। सः अवदत् यत्, निष्ठुराय अपराधाय किमपि समर्थनं नास्ति इति। सः आशां प्रकटितवान् यत् आक्रमणस्य आयोजकाः अपराधिनः च उचितं दण्डं प्राप्स्यन्ति इति।

### प्रधानमन्त्री-यात्रा

प्रधानमन्त्रिणा नरेन्द्रमोदिना जम्मूकश्मीरस्य पहलगामक्षेत्रे दुरापादितस्य आतङ्क्याक्रमवस्य अनन्तरं सऊदीअरबस्य स्वराजकीययात्रा मध्ये एव स्थगिता। असौ सम्प्रति भारतं प्रत्यागतवान्। अस्माकं वार्ताहरः सूचितवान् यत् अल्पयात्रावधौ एतस्मिन् नैकेः महत्त्वपूर्ण-परिणामाः समक्षं समागताः। उभयोः देशयोः नेतारौ ऊर्जा-रक्षा-व्यापार-निवेश-प्रौद्योगिकी-संस्कृति-इत्येतेषां क्षेत्राणां समीक्षां कृतवन्तौ। भारत-मध्य-पूर्व-यूरोपार्थिक-वीथ्यां प्रगतिमापि समीक्षितवन्तौ। द्विपक्षीयोपवेशनावधौ अन्तरिक्ष-स्वास्थ्य-क्षेत्रं समेत्य चतुर्षु सन्धिपत्रेषु हस्ताक्षरं जातम्।

## आई.पी.एल्.

आई.पी.एल्. इत्येतस्यां विंशतिप्रतिविंशतिक्रिकेट्-मालिकायाम् ह्यः लखनऊनगरे एकानाक्रीडाङ्गणे डेल्हीकैपिटल्सदलेन लखनऊ-सुपर-जायन्ट्स-दलम् अष्टस्तोभैः पराजितम्। अद्य सनराइजर्स-हैदराबाद मुम्बई इंडियन्स दलयोर्मध्ये हैदराबाद नगरे द्वन्द्वं क्रीडिष्यते।

।। इति वार्ताः।।